# Shri Shivakamasundari Ashtakam

# श्रीशिवकामसुन्दर्यष्टकम्

## Document Information

Text title : Shivakamasundari Ashtakam

File name : shivakAmasundaryaShTakam.itx

Category : devii, aShTaka

Location : doc_devii

Transliterated by : PR Kannan

Proofread by : PR Kannan

Translated by : PR Kannan

Description/comments : Nataraja Stavamanjari Page 85

Latest update : June 8, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2022

*sanskritdocuments.org*

# श्रीशिवकामसुन्दर्यष्टकम्

पुण्डरीकपुरमध्यवासिनीं
नृत्तराजसहधर्मचारिणीम् ।
अद्रिराजतनयां दिने दिने
चिन्तयामि शिवकामसुन्दरीम् ॥ १॥

I meditate every day on Sivakamasundari, residing in the centre of Pundarikapuram (Chidambaram), the consort of Nataraja, the daughter of Himavan, the king of Mountains. (1)

ब्रह्मविष्णुमुखरामरेडितां
बाहुपद्म शुकवत्सशोभिताम् ।
बाहुलेयकलभाननात्मजां
चिन्तयामि शिवकामसुन्दरीम् ॥ २॥

I meditate on Sivakamasundari, who is worshipped by Devas like Brahma and Vishnu, whose lotus hand is adorned with a young parrot, whose children are Subrahmanya and Gajanana. (2)

वेदशीर्षविनुतात्मवैभवां
वाञ्छितार्थफलदानतत्पराम् ।
व्याससूनुमुखतापसार्चितां
चिन्तयामि शिवकामसुन्दरीम् ॥ ३॥

I meditate on Sivakamasundari, whose spiritual splendour is adored by Upanishads, who is intent on bestowing desired fruits, who is worshipped by sages like Suka, the son of Vyasa. (3)

दिव्यरत्नमणिभूषणाम्बरां
देवराजमहिलादि संवृताम् ।

दानवारिसहजां दयानिधिं
चिन्तयामि शिवकामसुन्दरीम् ॥ ४॥

I meditate on Sivakamasundari, who is adorned in ornaments studded with divine gems; who is surrounded by devotees like Indrani; who is the sister of Vishnu, the enemy of Asuras; who is the treasure of compassion.(4)

षोडशार्णपरदेवतामुमां
पञ्चबाणनिचयोद्भवेक्षणाम् ।
पारिजाततरुमूलमण्डपां
चिन्तयामि शिवकामसुन्दरीम् ॥ ५॥

I meditate on Sivakamasundari, Uma, the Supreme Devata in the Shodasi mantra, whose glance brought to life Manmatha, the wielder of five arrows, whose abode is in hall at the foot of Parijata tree. (5)

विश्वयोनिममलामनुत्तमां
वाग्विलासफलदां विचक्षणाम् ।
वारिवाहसदृशालकाम्बरां
चिन्तयामि शिवकामसुन्दरीम् ॥ ६॥

I meditate on Sivakamasundari, who is the source of the universe, who is pure and unsurpassed, who bestows the fruit of elegant speech, who is marked by splendour, whose locks look in colour like water bearing clouds. (6)

नन्दिकेशविनुतात्मवैभवां
नाममन्त्रजपकृत् सुखप्रदाम् ।
नाशहीनपददां नटेश्वरीं
चिन्तयामि शिवकामसुन्दरीम् ॥ ७॥

I meditate on Sivakamasundari, whose spiritual glory is worshipped by Nandikesa; who bestows comfort on one who chants the mantras of her names; bestower of state which has no decay; Iswari of dance. (7)

सोमसूर्यहुतभुक् त्रिलोचनां
शर्वमोहनकरीं सुधीडिताम् ।
सत् त्रिवर्ग परमात्मसौखदां
चिन्तयामि शिवकामसुन्दरीम् ॥ ८॥

I meditate on Sivakamasundari, who has three eyes of Chandra, Surya and Agni; who enchants Siva; who is worshipped by the wise; bestower of the virtuous group of three objectives, Dharma, wealth and desire, and the Bliss of Paramatma. (8)

पुण्डरीकचरणर्षिणा कृतं स्तोत्रमेतदघहं पठन्ति ये ।
पुण्डरीकपुरनायिकाऽम्बिका यच्छतीष्टमखिलं महेश्वरी ॥(९) ॥

Those who chant this Stotra, which rids one of sins, written by Pundarikacharana Rishi, are blessed by Mother Sivakamasundari, the mistress of Pundarikapura, Chidambaram, the Supreme Iswari, with all that they desire. (9)

इति श्रीशिवकामसुन्दर्यष्टकं सम्पूर्णम् ।

# श्रीशिवकामसुन्दर्यष्टकम्

## श्रीशिवकामसुन्दर्यष्टकं

पुण्डरीकपुरमध्यवासिनीं
नृत्तराजसहधर्मचारिणीम् ।
अद्रिराजतनयां दिने दिने
चिन्तयामि शिवकामसुन्दरीम् ॥ १॥

ब्रह्मविष्णुमुखरामरेडितां
बाहुपद्म शुकवत्सशोभिताम् ।
बाहुलेयकलभाननात्मजां
चिन्तयामि शिवकामसुन्दरीम् ॥ २॥

वेदशीर्षविनुतात्मवैभवां
वाञ्छितार्थफलदानतत्पराम् ।
व्याससूनुमुखतापसार्चितां
चिन्तयामि शिवकामसुन्दरीम् ॥ ३॥

दिव्यरत्नमणिभूषणाम्बरां
देवराजमहिलादि संवृताम् ।
दानवारिसहजां दयानिधिं
चिन्तयामि शिवकामसुन्दरीम् ॥ ४॥

षोडशार्णपरदेवतामुमां
पञ्चबाणनिचयोद्भवेक्षणाम् ।
पारिजाततरुमूलमण्डपां
चिन्तयामि शिवकामसुन्दरीम् ॥ ५॥

विश्वयोनिममलामनुत्तमां
वाग्विलासफलदां विचक्षणाम् ।

वारिवाहसदृशालकाम्बरां
    चिन्तयामि शिवकामसुन्दरीम् ॥ ६॥

नन्दिकेशविनुतात्मवैभवां
    नाममन्त्रजपकृत् सुखप्रदाम् ।
नाशहीनपददां नटेश्वरीं
    चिन्तयामि शिवकामसुन्दरीम् ॥ ७॥

सोमसूर्यहुतभुक् त्रिलोचनां
    शर्वमोहनकरीं सुधीडिताम् ।
सत् त्रिवर्ग परमात्मसौखदां
    चिन्तयामि शिवकामसुन्दरीम् ॥ ८॥

पुण्डरीकचरणर्षिणा कृतं स्तोत्रमेतदघहं पठन्ति ये ।
पुण्डरीकपुरनायिकाऽम्बिका यच्छतीष्टमखिलं महेश्वरी ॥(९) ॥

इति श्रीशिवकामसुन्दर्यष्टकं सम्पूर्णम् ।

Encoded, proofread, and translated by PR Kannan.

*Shri Shivakamasundari Ashtakam*

pdf was typeset on June 8, 2022

Please send corrections to *sanskrit@cheerful.com*